# Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Mangalam

# શ્રીદક્ષિણશેષાચલેશશ્રીનિવાસભગવન્મઙ્ગલમ્

## Document Information

Text title : Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Mangalam

File name : dakShiNAsheShAchaleshashrInivAsabhagavanmangalam.itx

Category : vishhnu, mangala, venkateshwara

Location : doc_vishhnu

Author : saralakavi rAghavAchArya

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : for the Deity on the hill of Vaiyavur

Latest update : March 20, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Mangalam

# શ્રીદક્ષિણશેષાચલેશશ્રીનિવાસભગવન્મઙ્ગલમ્

શ્રીમતે પ્રસન્નવેઙ્કટેશશ્રીનિવાસાય નમઃ ।

શ્રિયઃ કાન્તાય કલ્યાણનિધયે નિધયેઽર્થિનામ્ ।
શ્રીવેઙ્કટનિવાસાય શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૧॥

શ્રીમદ્દક્ષિણશેષાદ્રિ શિરસ્પદવિહારિણે ।
પ્રસન્નવેઙ્કટેશાય શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૨॥

સર્વમઙ્ગલરૂપાય સર્વમઙ્ગલમૂર્તયે ।
સર્વમઙ્ગલદાયાસ્તુ શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૩॥

સર્વભૂતશરણ્યાય સર્વપ્રણતબન્ધવે ।
સર્વકર્મભિરર્ચ્યાય શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૪॥

સર્વન્તરાત્મને સર્વવપુષે સર્વશક્તયે ।
સર્વજ્ઞાય બ્રહ્મણેઽસ્તુ શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૫॥

છત્રત્ફણાલિભોગીન્દ્રભોગાન્તસ્સ્થાનમીયુષે ।
ચતુર્ભુજાય ભદ્રાય શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૬॥

સર્વવેદૈકવેદ્યાય સર્વવેદાન્વિજાનતે ।
સર્વલોકનિવાસાય શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૭॥

આદિકોલેન ચક્રેણ વામદક્ષિણપાર્શ્વયોઃ ।
ભાસ્વરાય શ્રિયઃ પત્યે શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૮॥

વામદક્ષિણપાણિભ્યાં પાઞ્ચજન્યસુદર્શનૌ ।
મુદાસદાદધાનાય શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૯॥

નમેદં મત્પદં ભક્ત સુતરસ્સ્યાદ્ભવસ્તવ ।
ઇતિ સૂચયતે દોર્ભ્યાં શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૧૦॥

સતાં ભક્ત્યાપ્રપત્ત્યા વા પ્રસન્નાય દયાલવે ।

અપવર્ગપ્રદાયાસ્તુ શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૧૧॥

અસ્ત્રભૂષણતાપન્નસર્વતત્ત્વાય માયિને ।
સર્વેશ્વરેશ્વરાયાસ્તુ શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૧૨॥

સર્વશ્રુત્યભિનૂતાય સર્વશ્રેયોવિધાયિને ।
શ્રિયઃકાન્તાય પૂર્ણાય શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૧૩॥

ચતુર્મુખાદિભિઃ સર્વૈઃ પૂજ્યમાનાય નિર્જરૈઃ ।
ભક્તાનાં સુલભાયાસ્તુ શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૧૪॥

રમાનિત્યવિહારાઢ્યવિશાલશુભવક્ષસે ।
વિશ્વકલ્યાણરૂપાય શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૧૫॥

ઉપત્યકાધિત્યકયોર્દક્ષિણસ્યાહિભૂભૃતઃ ।
દ્વિધા હનુમતાર્ચ્યાય શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૧૬॥

ધર્મસ્થાપનસદ્રક્ષાદુષ્કૃદ્ ધ્વંસફલાન્ બહૂન્ ।
ભાવાનાશ્રયતે દિવ્યાન્ શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૧૭॥

મઙ્ગલાશાસનપરૈસ્સુરૈસ્સર્વૈર્નરૈરપિ ।
આચાર્યૈશ્ચાર્ચિતાયાસ્તુ શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૧૮॥

શ્રીસીતારામસદ્ભક્ત હૃદયામ્બુજવાસિને ।
તદ્ભક્તાભીષ્ટદાયાસ્તુ શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૧૯॥

વાત્સ્યરાઘવસૂર્યુક્તં શ્રીનિવાસાય મઙ્ગલમ્ ।
શુભદં યઃ પઠેન્નિત્યં સ ભવેત્સર્વમઙ્ગલઃ ॥ ૨૦॥

ઇતિ શ્રીદક્ષિણશેષાચલેશ શ્રીનિવાસભગવન્ મઙ્ગલં સમ્પૂર્ણમ્ ।
શ્રીનિવાસાય નમઃ ।

Proofread by Aruna Narayanan

*Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Mangalam*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*